नं. — ५००४

बाल्मीकि रामायणं
बाल काण्डे १म सर्गः
तत्व दीपिका टीका

× × × ×

पत्र. १६ — सं. ×

विषय: (पुराण) माहात्म्यं

वाल्मीकिरामायणबालकाण्डटीका
तत्त्वदीपिका प्रथम सर्गः

५००४

5004

F. = 16

ॐजयतिरघुवंशतिलककौशल्यानन्ददोरामः दशवदननिधनकारी
दाशरथिःपुण्डरीकाक्षः॥१ रामोराजमणिःसदाविजयतेरामंरमेशंभजे
रामेणाभिहतानिशाचरचमूरामायतस्मैनमः रामान्नास्तिपरंगुरुतरं
रामस्यदासोस्म्यहंरामेचित्तलयःसदाभवतुमेहेराममांपालय २
श्रीआंजनेयमतिपाटलाननंकांचनाद्रिकमनीयविग्रहम् पारिजा
ततरुमूलवासिनंभावयामिपवमाननन्दनम्॥१ श्रीरामायनमः

ॐ नमस्तस्मै मुनीन्द्राय श्रीयुताय तपस्विने सर्वज्ञानाधिवासाय वाल्मीकिमुनये नमः

वाल्मी ॐ श्रीगणेशाय नमः ॐ नमो रामचंद्राय कारुण्यामृतनीरमाश्रितजनश्रीचातकानंददं शार्ङ्गोद्दंडलचापमंजुजभ
रा. टी वोपेंद्रादिवहीष्टदं चारुस्मेरमुखोल्लसज्जनकजासौदामिनीशोभितं श्रीरामांबुदमाश्रयेखिलजगत्संसारतापाप
१ हं १ प्रणम्य नारायणतीर्थदेशिकान्भवानलार्तामृतपूरनीरदान् करोति [illegible]रायणतत्त्वदीपिकां महेशतीर्थाख्य
यतिर्यथामति २ अवलोकनसौकर्यमालोच्य कतसारतः नानाटीकास्थवाक्यानि लिख्यंतेत्र यथामति ३ सर्वे

श्रीरामचंद्राय नमः कूजंतं राम रामेति मधुरं मधुराक्षरं आरुह्य कविताशाखां वंदे वाल्मी
किकोकिलं १ वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः शृण्वन् रामकथानादं को
न याति परां गतिं यः पिबन् सततं रामचरितामृतसागरं अतृप्तस्तं मुनिं वंदे प्राचेतस
मकल्मषं गोष्पदीकृतवारीशं मशकीकृतराक्षसं रामायणमहामालारत्नं वंदेनिलात्म
जं अंजनीनंदनं वीरं जानकीशोकनाशनं कपीशमक्षहंतारं वंदे लंकाभयंकरं ५ ॥

षां ग्रंथकर्तॄणां लेखकोहं न कल्पकः लिखितान्यन्यतैर्यानि लिख्यंतेतान्यतो मया ४ ग्रंथबाहुल्यभीत्यात्र क्वचिच्छु राम
द्धसुशोधनं निबंधकथनं चार्थप्रश्नानालिख्यतेधुना ५ सीतारामौ समुद्दिश्य पापविराधखररावणैः उक्तानां पहेषा १
क्षीनां वा सत्त्वार्थोत्र वर्ण्यते ६ ब्रह्मलोकप्रसिद्धं शतकोटिप्रविस्तरं श्रीरामचरितं भूलोकवर्तिनां चतुर्वर्णानां ताप
त्रयविमोचनाय संक्षिप्य रचयितुमुद्युक्तः परमकारुणिको ब्रह्मा वाल्मीकिरूपेणाभूमौ स्वांशेन समभवत् ७ त
थाच स्कांदे पार्वतीं प्रति शिववचनं वाल्मीकिरभवद्ब्रह्मा वाणी वाक्तस्य रूपिणी चकार रामचरितं पावनं चरितव्रतः इति ॥

एवं च ब्रह्मणा शप्तो भगवान्प्राचेतसः स्वचिकीर्षितं रामचरितं गुरुमुखात् श्रोतव्यमिति न्यायेन भगवत्कृपोपदेशे
सर्वगुरुं नारदं प्रतीक्षमाण आस्ते स्म अथ ब्रह्मनियोगेन समागतं नारदं अभ्यर्च्य वाल्मीकिः को न्वस्मिन्नित्यादि पप्रच्छ स
च देवर्षिः परमेश्वरकथाप्रश्नमुदितमनाः श्रीरामचरित्रं संक्षिप्य बालकाण्डरूपेणोपदिश्य जगाम तदनु तमसातीरमुपस्प-
(स्पृ)श्य वनतो व्याधविद्धक्रौंचदर्शनजनितशोकस्य वाल्मीकेर्वदनान्मा निषादेति श्लोक उदभूत् ततः स्वाश्रममागम्य
तमेवानुसंदधानः सविस्मय आस्त अथ भगवान्ब्रह्मा चतुर्मुख आगत्य मत्छंदादेव ते ब्रह्मन्निस्माद्यभिधाय रामचरि २२

उल्लंघ्य सिंधोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः आदाय तेनैव ददाह लंकां
नमामि तं प्रांजलिराञ्जनेयं मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठं वाता-
त्मजं वानरयूथमुख्यं श्रीरामदूतं मनसा स्मरामि रामाय रामभद्राय रामचन्द्राय वेधसे रघु-
नाथाय नाथाय सीतायाः पतये नमः जितं भगवता तेन हरिणा लोकधारिणा अजेन वि-
श्वरूपेण निर्गुणेन गुणात्मना १ ॥ तं सर्वं विदितं भवत्विति वरं प्रदाय पद्मेश्वरे रामायणं कुर्वित्युपदिश्य स्व-
धाम जगाम अथ चतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकैः स्व-
कारतदिदं व्याक्रियते तपःस्वाध्यायेत्यादि गायत्रीसहितश्लोकसहस्रकैः चतुर्विंशतिसंख्योका गायत्री वर्णसं-
युताः ये श्लोकाः सन्ति तानत्र विलिखामि यथाक्रमं श्लोके च प्रतिसाहस्रं प्रथमे प्रथमे क्रमात् गायत्र्यक्षर-
मेकैकं स्थापयामास वै मुनिः गायत्र्यास्त्रीणि चत्वारि द्वे द्वे त्रीणि पञ्च षट् क्रमात् चत्वारि सप्त काण्डेषु स्थापितान्य

वाल्मी तत्र तदिति गायत्र्याः प्रथमाक्षरं तपः स्वाध्यायेत्यस्य श्लोकस्यादिमाक्षरेण तइत्यनेन संगृह्णाति तपःस्वाध्याय
रा॰टी॰ निरतं तपस्वी वाग्विदां वरं नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवं अत्र तपःशब्देन चित्तप्रसादहेतुभूतं व्रतनि
२ यमोपासनादिकर्मोच्यते यद्वा यस्य ज्ञानमयं तप इति श्रुतेः तपःशब्देन ब्रह्मविषयकं ज्ञानमुच्यते स्वाध्या
यशब्देन फलवदर्थाववोधपर्यंताध्ययनमुच्यते तयोर्निरतं एकाग्रचित्तं अनेन तपआलोचनधातोरूपत्वेन ए
न तपःशब्देन ज्ञानपर्यायेण सत्यंज्ञानमनंतं ब्रह्मेति ब्रह्मस्मरणं हि शिष्टेष्टदेवतास्मरणरूपं मंगलं कृतमिति

2

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरं ना
रदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवं १॥ ॥

त्यनुसंधेयं तपस्वी प्रशस्ततपा वाल्मीकस्यापत्यं वाल्मीकिः तदुक्तं ब्रह्मवैवर्ते अथाब्रवीन्महातेजा ब्रह्मालो
ब्रह्मा कपितामहः वल्मीकप्रभवो यस्माद्वाल्मीकिरित्यसाविति नारदं नरः परमात्मा तदुक्तं नरतीति नरः प्रोक्तः पर
मात्मा सनातन इति तस्य संबंधान्नारं परमात्मविषयकज्ञानं ददाति उपदिशतीति नारदः यद्वा नराणां सं
बंधान्नारमज्ञानं तद्द्यति खंडयति ज्ञानोपदेशेनेति नारदः तथा चोक्तं नारदीये गायन्नारायणकथां सदा राम
पापभयापहा नारदो नाशयन्नेति नृणामज्ञानजं तम इति १॥ ॥ ॥ ॥ २

कोन्वस्मिन्निति गुणवान् अत्र गुणशब्देन दृष्टगुणव्यतिरिक्तप्रशस्तगुणा उच्यन्ते प्रश्नप्रतिवचने दृष्टगुण
व्यतिरिक्तगुणप्रतिपादनात् स्वयं अक्षतः सन् येन परान् जयति तद्वीर्यं तद्वान् धर्मज्ञः सामान्यविशेषरूपध
र्मज्ञः येन केनचित्स्वस्मै किंचिदपि कृतमुपकारं बहुतया जानातीति कृतज्ञः सत्यवाक्यः सर्वावस्थास्वपि स
त्यवचनः दृढव्रतः फलपर्यंतं प्रारब्धव्रतापरित्यागशीलः २ चारित्रेणेति चरित्रमेव चारित्रं कुलक्रमाग

कोन्वस्मिन्सांप्रतं लोके गुणवान्कश्च वीर्यवान् धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः २
चारित्रेण च को युक्तः सर्वभूतेषु को हितः विद्वान्कः कः समर्थश्च कश्चैकप्रियदर्शनः ३
आत्मवान्को जितक्रोधो द्युतिमान्कोनसूयकः कस्य विभ्यति देवाश्च जातरोषस्य संयुगे ४

ताचारः तेन युक्तः सर्वभूतेषु को हित इत्यनेन सापराधेष्वपि हितकरणशीलत्वमुक्तं भवति विद्वान् विदि
तसकलवेद्यः समर्थः अन्यानिर्वाह्यकार्यनिर्वहणशक्तः कश्चैकप्रियदर्शनः एकमद्वितीयं प्रियं दर्श
नं यस्य सः प्रियस्य विषयद्वारकत्वात् असदृशावयवाभिरूप इत्यर्थः ३ आत्मवानिति आत्मवान्
धृतिमान् जितक्रोधः अत्र क्रोधशब्दः कामादीनामप्युपलक्षकः जितारिषड्वर्ग इत्यर्थः द्युतिमान् प्रशस्त
कान्तिमान् अनसूयकः गुणेषु दोषाविष्करणमसूया तद्रहितः कस्य संयुगे देवाश्च विभ्यति चकारादसु
राश्च ४॥

एतदिति एतदुक्तगुणकं नररत्नं प्रवक्तीत्यर्थः ५ श्रुत्वेति एतत्पूर्वोक्तं प्रश्नजातं त्रिलोकज्ञः त्रिलोक-
गोचरज्ञानवान् आमन्त्र्य एकाग्रमसि धार्यमभिमुखीकृत्य प्रहृष्टः कस्य विभ्यति देवाश्चेति पृष्टदेवादि-
भीषकत्वगुणसंपन्ने श्रीहरिनाम्नादिष्वप्रसक्तेरयं प्रश्नः सकलगुणविशिष्टसार्वभौमविषय इत्यवगम्यते
तत्रापि सार्वभौममात्रे पृष्टप्रशस्तसकलगुणसंपन्नेरसंभवात् सकलजगद्रक्षणार्थं नरूपरूपेणावती-

एतदिच्छाम्यहं श्रोतुं परं कौतूहलं हि मे महर्षे त्वं समर्थोसि ज्ञातुमेवंविधं नरं ५ ॥
श्रुत्वा चैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः श्रूयतामिति चामन्त्र्य प्रहृष्टो वाक्यमब्रवीत् ६
६ बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः ७
७ इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः नियतात्मा महावीर्यो द्युतिमान् धृतिमान्वशी ८ ॥

र्णे परमपुरुष एव संभवात् दिष्ट्या तद्गुणकीर्तनं लब्धमिति प्रहर्षः ६ बहव इति महापुरुषं निश्चित्य
वक्ष्यामि तैर्दुर्लभैर्गुणैर्युक्तो नरः श्रूयतामिति योजना ७ उक्तप्रशस्तसमस्तगुणविशिष्टत्वेन निश्चि-
तं परमपुरुषमुपदिशति इक्ष्वाकुवंशप्रभव इत्यादि रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यतीत्यने-
न प्रभवत्यस्मादिति प्रभवः उत्पत्तिस्थानं इक्ष्वाकुवंशः प्रभवो यस्य स तथोक्तः रामः रमन्ते स्मिन्निति रामः
नामशब्दः प्रसिद्धो नियतात्मा सुशिक्षितमनाः वशी जितेन्द्रियः ८ ॥

बुद्धिमानिति बुद्धिमान्प्रशस्तधीः बुद्धेः प्राशस्त्यं नाम शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ऊहापोहार्थ
विज्ञानं तत्त्वज्ञानं च धीगुणाः इति उक्तगुणविशिष्टत्वं नीतिमान् अतिशये प्राशस्त्ये वा मतुप् वाग्मी प्रशस्तवा
क् श्रीमान् सर्वातिशायिश्रीः अत्र चोपजीव्यत्वात् ऋषिस्तामानिसाश्रीहि रमणनासतामित्युक्तं श्रीः तौ श्रीर्विवक्षिता विपुलां
स मांसलोन्नतभुजशिरस्कः महाहनुः परिकपोलपरिभागवान् गूढजत्रुः गूढे निमग्ने जत्रुणी वक्षोंसयोः

बुद्धिमान्नीतिमान्वाग्मी श्रीमाञ्छत्रुनिवर्हणः विपुलांसो महाबाहुः कंबुग्रीवो म
हाहनुः ९ महोरस्को महेष्वासो गूढजत्रुररिंदमः आजानुबाहुः सुशिराः सुलला
टः सुविक्रमः १० ॥

संधिगतेऽस्थिनी यस्य सः तथोक्तः अरीन्कामादीन् दमयतीत्यरिंदमः ९ आजानुबाहुः जानुपर्यंत
दीर्घबाहुः सुशिराः सुशिरस्त्वं नाम वृत्तशिरा इत्यादि सामुद्रिकशास्त्रोक्तलक्षणसहितशिरोविशिष्ट
त्वं सुललाटः ललाटे यस्य हृश्यंते चतुस्त्रिद्व्येकरेखाः इत्युक्तं चतुर्लेखासौभाग्यविशिष्टालिकत्वं
सुविक्रमः पादविन्यासो यस्य सः विक्रमस्य सौष्ठवं नाम गजसिंहादिगतिसदृशत्वं १० ॥ ॥

वाल्मी समइति समः षण्णवत्यंगुलोत्सेधो यः पुमान्स प्रकाशात इत्युक्तप्रकारेणन्यूनानतिरिक्तविग्रहपरिमाणः
रा टी समविभक्तांगः समानि अन्यूनानतिरिक्तानि पृथक्कृतानि अंगानि अवयवा यस्य स तथोक्तः अनेनोभ
४ यपार्श्वस्य चक्षुःश्रोत्रबाह्वादीनामंगानामुपांगानां च समत्वमुक्तं भवति निर्णिक्तं इनीलवर्णइत्यर्थः प्र
तापवान् श्रवणमात्रेण शत्रुहृदयविदारकत्वेन प्रशस्तपौरुषः लक्ष्मीवान् अत्र लक्ष्मीशब्देन सर्वोत्तरा
वयवसौभाग्यमुच्यते शुभलक्षणः शुभानि मंगलायतनानि लक्षणानि सामुद्रिकशास्त्रोक्तानि यस्य सः त

समः समविभक्तांगः स्निग्धवर्णः प्रतापवान् पीनवक्षा विशालाक्षो लक्ष्मीवाञ्छुभल
क्षणः ११ धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः यशस्वी ज्ञानसंपन्नः शुचिर्वश्यः
समाधिमान् १२ प्रजापतिसमः श्रीमान्धाता रिपुनिषूदनः रक्षिता जीवलोकस्य
धर्मस्य परिरक्षिता १३ ॥

थोक्तः ११ धर्मज्ञ इति सत्यसंधः सत्या यथार्था संधा प्रतिज्ञा यस्य स तथोक्तः ज्ञानसंपन्नः सर्वविषयज्ञानसंपन्न इत्य
र्थः शुचिः बाह्याभ्यंतरशुद्धियुक्तः वश्यः पित्राचार्यदेवविनीतः १२ श्रीमान् अत्यंतडिते ऐश्वर्यसंपन्नः धाता स राम
कलजगद्धारणपोषणसामर्थ्ययुक्तः रिपुनिषूदनः आश्रितजनानां ये रिपवस्तेषां नाशकः रक्षिता जीवलोकस्य ४
प्रजानामनिष्टनिरसनपूर्वकेष्टप्रापणस्य कर्तेत्यर्थः धर्मस्य परिरक्षणं नाम तत्तद्धर्मेषु वर्णाश्रमाणां नियो
जनं १३ ॥ ॥

रक्षिता स्वस्य धर्मस्य अत्र धर्मशब्दः यजनाध्ययनदानपरः तस्य परिपालयिता स्वजनस्य च रक्षिता स्वजनस्याश्रित
बांधवादेः जीवलोकस्य रक्षितेत्यनेनैव आश्रितादिजनरक्षणे सिद्धेपि पुनस्तद्रक्षणकथनं विशेषतो रक्षण
वेद द्योतनार्थं वेदांगतत्वज्ञः वेदानां चतुर्णां वेदांगानां शिक्षादीनां च पाठतोर्थतश्च तत्वम् अवाधितं स्वरूपं जा
नातीति तथा धनुर्वेदे च निष्ठितः अस्त्रशस्त्रादिप्रतिपादकं शास्त्रं धनुर्वेदः तस्मिन्निष्ठितो निष्णातः सर्व
शास्त्रार्थतत्वज्ञः सांख्ययोगतर्कवैशेषिकपूर्वोत्तरमीमांसाव्याकरणनिरुक्तं तथाच सर्वशास्त्राणि सर्वेषा

रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता वेदवेदांगतत्वज्ञो धनुर्वेदे च निष्ठितः १४ स
र्वशास्त्रार्थतत्वज्ञः स्मृतिमान् प्रतिभानवान् सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः १५

मेषाम् अर्थतत्वज्ञः पाठस्मानतिप्रयोजनत्वात् अर्थविशेषणं स्मृतिमान् पूर्वानुभूतार्थाविस्मरणशीलः प्रति
भानवान् प्रज्ञा नवनवोन्मेषशालिनी प्रतिभां विदुरित्युक्ता प्रतिभानेन तद्वान् सर्वलोकप्रियः सर्वलोकानां प्रि
यः सर्वलोकाः प्रियाः यस्येति वा साधुः अपकारिष्वप्युपकारशीलः अदीनात्मा अतिव्यसनपरंपरायामपि अ
क्षुभितान्तःकरणः विचक्षणः तत्तत्कालकर्तव्यचतुरः १४ १५ ॥ श्रीरामलक्ष्मणाभ्यां नमः ॥ ॥

प्रतिभा

वाल्मी टी ५

सर्वदेति नदीभिः समुद्र इव सद्भिर्महात्मभिः सर्वदाभिगतः सेवितः सर्वदेत्यनेन नदीनां समुद्रसेवायामिव भ-
क्तानां भगवत्सेवायां कालनियमो नास्तीत्युक्तं भवति अभिगत इत्यनेन परमप्राप्यत्वमुक्तं समुद्र इव सिंधुभि-
रित्यनेन सन्तानप्राप्यान्तररहितं संपद्यते प्राप्तानां च सत्तान्तेन सह ऐक्यं च प्रतीयते आर्यः पूज्यः सर्वसमः सर्वे-
षु शत्रुमित्रोदासीनेषु वैषम्यरहितः सदैव प्रियदर्शनः सदैव सर्वावस्थासु सुखदुःखेष्वपि अनन्तु-
भूतपूर्ववद्विस्मयनीयदर्शनः १६ सर्वगुणोपेतः उक्तानुक्तसकलसद्गुणसंपन्नः कौशल्यायाः आन-

सर्वदाभिगतः सद्भिः समुद्र इव सिंधुभिः आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः १६
स च सर्वगुणोपेतः कौशल्यानंदवर्धनः समुद्र इव गांभीर्ये स्थैर्ये हिमवानिव १७
विष्णुना सदृशो वीर्ये सोमवत्प्रियदर्शनः कालाग्निसदृशः क्रोधे क्षमया पृथिवीसमः १८

दं वर्द्धयतीति तथा च सर्वगुणोपेत इति संक्षेपेणोक्तानं तगुणेषु कतिपयगुणानाह समुद्र इवेति श्लोकद्वये-
न गांभीर्ये अगाधाशयत्वे समुद्रतुल्यः धैर्यमनसा दृढत्वं १७ विष्णुनेति यद्यप्ययमेव रामो विष्णुः तथापि
मानुषोपाधिभेदात् विष्णुनेति सादृश्यं यद्वा विष्णुनास्य नैश्वीर्यसदृशः उपमानान्तररहित्यमनेनोक्तं सोम-
वत्प्रियदर्शनः चंद्रवत्सर्वानंदकरः कालाग्नीति अनेन युद्धादावनिवार्य्यकोपत्वमुक्तं क्षमया पृथिवीस-

राम ५

धनदेनेति त्यागे सत्यपि धनदे अक्षीणकोशत्वं महोदारत्वं चोक्तं सत्ये धर्म इवापरः सत्ये सत्यवचने अपरो द्वितीयो धर्म
इव एवं रामभद्रे सर्वगुणानभिधाय तस्मिन् तद्गुणान्स्फुटयितुं तच्चरितं वक्तुमारभते तमेवमित्यादिना इतआ
रभ्य अयोध्याकांडग्रंथ[illegible]संग्रहः क्रियते अतः प्राक्तनश्लोकैर्बालकांडार्थः सूचितः तत्र इक्ष्वाकुवंशप्रभव इ
ति भगवदाविर्भावः सूचितः महावीर्यः शत्रुनिबर्हण इति च अस्त्रसंपत्तिस्ताटकावधादिः सूचितः लक्ष्मीवा
निति सीतापरिणयनसंक्षेपः सत्यपराक्रममित्यनुवादेन भार्गवलोकप्रतिबंधातव्यापारः संक्षिप्तो वेदितव्यः

धनदेन समस्त्यागे सत्ये धर्म इवापरः तमेवं गुणसंपन्नं रामं सत्यपराक्रमं १९ ज्येष्ठं
श्रेष्ठगुणैर्युक्तं प्रियं दशरथः सुतं प्रकृतीनां हितैर्युक्तं प्रकृतिप्रियकाम्यया २० ॥

एवं गुणसंपन्नं प्रागुक्तासाधारणकल्याणगुणसंपन्नं श्रेष्ठगुणैः राज्याभिषेकार्हवरिष्ठगुणैस्संयुक्तं सत्यप
सप्तत राक्रमं अमोघपराक्रमं प्रकृतीनां हितैरिहामुत्रयशस्करैः कर्मभिर्युक्तं ज्येष्ठं सुतं रामं प्रकृतिप्रियकाम्यया
प्रकृतीनां हितं कर्तुमिच्छया पितरि राज्यं कुर्वत्येव सर्वनिर्वाहकत्वेनाभिषिक्तः पुत्रो युवराजः तस्य भावो यौवरा
ज्यं तेन संयोक्तुं संयोजयितुं महीपतिर्दशरथः १९ २० ॥ ॥ रामायण तुभ्यं नमः ॥ ॥

वाल्मी
रा टी
६

ऐच्छदिति श्लोकद्वयमेकं वाक्यं तस्येति तस्य रामस्याभिषेकसंभारान् संभ्रियंतेइति संभाराः अभिषेकार्थसंभृतान्
दध्यादिमंगलद्रव्यविशेषान् दृष्ट्वा मंथरावचनात् ज्ञात्वा पूर्वं पुरा दत्तवरा दत्तौ वरौ यस्यै इंद्रसहायार्थं प्रवृत्तेन दश
रथेन युद्धकाले दशरथेपरश्युक्ता मासुरीमायां प्रवलायां मुनिदत्तविद्यया वारयंत्यै कैकेय्यै तुष्टेन दशरथेन।
दत्तं वरद्वयं इति पौराणिकी प्रसिद्धिः यद्वा पूर्वं दत्तवरा देवासुरयुद्धे दशरथस्य सारथ्यमाचरंत्या कैकेय्या संतु
ष्टाद्दशरथाद्वरद्वयं लब्धमिति तत्रापि विक्षतः शस्त्रैः पतिस्तरक्षितस्तया तुष्टेन तेन दत्तौ तु द्वौ वरौ शुभदर्शे

यौवराज्येन संयोक्तुमैच्छत्प्रीत्या महीपतिः तस्याभिषेकसंभारान्दृष्ट्वा भार्याथ कैकयी २१
पूर्वं दत्तवरा देवी वरमेनमयाचत विवासनं च रामस्य भरतस्याभिषेचनं २२ स सत्य
वचनाद्राजा धर्मपाशेन संयतः विवासयामास सुतं रामं दशरथः प्रियं २३ स जग
गाम वनं वीरः प्रतिज्ञामनुपालयन् पितुर्वचननिर्देशात्कैकेय्याः प्रियकारणात् २४ ॥

न इति मंथरावचनादवगम्यते वरमिति जातावेकवचनं वरद्वयस्वरूपमाह विवासनमिति २२ स
इति दशरथः सत्यवचनाद्धेतोः धर्ममयेन पाशेन संयतः बद्धः सन् प्रियं सुतमपि विवासयामास २३
स इति [illegible] स रामः वीरः जितेंद्रियः अनेकैरपराद्धुरुत्वतया योद्धेति वा कैकेय्याः प्रियकारण।
प्रीतिनिमित्तं पितुर्वचननिर्देशान्नियोगात् प्रतिज्ञामनुपालयन् तद्ब्रूहि वचनं देवि राज्ञो यदभिकां
क्षितं करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते इत्येवं कैकेय्याः सन्निधौ पितृवचनपरिपालनविषयां स्वकृ

[illegible] ॥ २४ ॥

राम
६

तमिति प्रियः रामेण सह जन्मप्रीतिमान् भ्राता रामस्य दयितः इष्टः विनयसंपन्नः लक्ष्मणो भ्राता २५ सौभ्रात्रं
सुभ्रातृभावं अनुदर्शयन् स्नेहभक्त्यैवानुजगाम न पित्रादिनिर्देशात् रामस्य दयिता इष्टा भार्या नित्यं निरतिश
य प्रेमास्पदा नित्यं हितकारिणी च २६ जनकस्य कुले गृहे यज्ञगृहे जाता आविर्भूता देवमायेव सुन्दोप
सुन्दमोहनार्थं देवैर्हस्त्यादिता सर्वोत्तरसौन्दर्या तिलोत्तमेव यद्वा असुरव्यामोहनार्थं अमृतविनियोग

तं व्रजन्तं प्रियो भ्राता लक्ष्मणोऽनुजगाम ह स्नेहाद्विनयसंपन्नः सुमित्रानन्दवर्द्धनः २५
भ्रातरं दयितो भ्रातुः सौभ्रात्रमनुदर्शयन् रामस्य दयिता भार्या नित्यं प्राणसमा हिता २६
जनकस्य कुले जाता देवमायेव निर्मिता सर्वलक्षणसंपन्ना नारीणामुत्तमा वधूः २७ सी
ताप्यनुगता रामं शशिनं रोहिणी यथा पौरैरनुगतो दूरं पित्रा दशरथेन च २८ ॥ ॥

समये स्वनिर्मिता देवस्य विष्णोर्मोहनवनितेव सर्वलक्षणसंपन्ना सामुद्रिकशास्त्रोक्तसर्वस्त्रीलक्षणसंपन्ना
उत्कर्षाणां रामउत्तमः नारीणामुत्तमा वधूः स्त्री २७ सीता लाङ्गलपद्धतिः तद्रूपत्वात्सीतेति निर्दिश्यते अथ च
धर्मात्मा रामः पौरैः पित्रा दशरथेन च दूरमनुगतः २८ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥

गंगातीरे वर्तमानं शृंगवेरपुरे स्थितं निषादाधिपतिं प्रियं इष्टं गुहं आसाद्य रामः विसर्जनार्थं आगतं सूतं गंगाकू-
ले व्यसर्जयत् अत्यजत् २९ गुहेनेति स रामः लक्ष्मणेन सीतया च सह गुहेन हितः सहितः गंगातीरे तत्र स्थिताः
यद्वा गुहमासाद्य गुहेन लक्ष्मणेन सीतया च सहितो रामः सुमित्रं व्यसर्जयदिति श्लोकद्वयेन वाक्यं तेवनेने
ति ते वनपादचारणमिति संप्रदायः ते त्रयः ते वनेन पादचारेण वनं गत्वा बहूदका नदीस्तीर्त्वा अनुप्रा

शृंगिवेरपुरे सूतं गंगाकूले व्यसर्जयत् गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियं २९
गुहेन सहितो रामो लक्ष्मणेन च सीतया तेवनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः ३०
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात् रम्यमावसथं कृत्वा रममाणा वने त्रयः ३१ दे
वगंधर्वसंकाशास्तत्र ते न्यवसन् सुखं चित्रकूटं गते रामे पुत्रशोकातुरस्तदा ३२
राजा दशरथः स्वर्गं जगाम विलपन् सुतं मृते तु तस्मिन् भरतो वसिष्ठप्रमुखैर्द्विजैः ३३

भरद्वाजस्य शासनात् चित्रकूटं प्राप्य रम्यमावसथं पर्णशालालक्षणं तत्र रममाणा देवगंधर्वसंकाशाः सुखं न्य-
वसन्निति योजना रामे चित्रकूटं गते सति ३० तदा पुत्रशोकातुरो राजा पुत्रं सुतं विलपन् परिदेवनं कुर्वन् स्व-
र्गं जगाम तस्मिन् दशरथे मृते भरतस्तु वसिष्ठादिभिः राज्याय नियुज्यमानः महाबलः राज्यं कर्तुं सम-
र्थोऽपि सो ध्याज्ञाद्राज्यं नैच्छज्जगामेति वीरः वीर्येण युक्तः अत्र वीर्यं नाम अन्तःशत्रुभूतरागरहितत्वं विषयानाकृ-

राम
१

रामपादप्रसादकः पादशब्दः पूज्यवाची पूज्यं रामं प्रसन्नं कर्तुमित्यर्थः २४ गत्वेति रामो ऽभिरामः आर्यभा
वपुरस्कृत्य विनयपुरस्कृतः सत्यसु महात्मा सुशोभनः महान् आत्मा अन्तःकरणं यस्य याचनस्वाभिलषितमि मिलाषि
ति शेषः सत्यसु कार्यवतां पुंसामलम्बाग्रतस्थितिरिति न्यायेन सती अग्रतो वस्थानमात्रेण स्वाभिप्रायेनि
वेदितेपि दैन्यप्रख्यापनार्थं पुनर्याचदिति भावः २५ अभिलषितमेवाह त्वमेवेति धर्मज्ञः सर्वगुणश्रेष्ठस
निकनिष्टस्य राज्याईतानात्मीन्य सुधर्मत्वमेव जानासि अतस्त्वमेव राजेति रामवचो ऽब्रवीदिति संबंधः २६

नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः स जगाम वनं वीरो रामपादप्रसादकः २४
गत्वा तु सुमहात्मानं रामं सत्यपराक्रमम् अयाचद्भ्रातरं राममार्यभावपुरस्कृतः २५
त्वमेव राजा धर्मज्ञ इति रामं वचो ऽब्रवीत् रामो ऽपि परमोदारः सुमुखः सुमहायशाः २६
न चैच्छत्पितुरादेशाद्राज्यं रामो महाबलः पादुके चास्य राज्याय न्यासं दत्वा पुनः पुनः २७

मोऽपि रमयतीति सुमुखात्मास्वरूपगुणैराश्रितचित्तरंजकस्तत्स्वभावोपि सुमुखः अर्थिजनलाभेन प्रसन्नमुखः ।
परमोदारः पात्रकाभीष्टदाननिरतः महायशाः न ह्यर्थिनः कार्यवशादुपेताः ककुत्स्थवंशे विमुखाः प्रयांतीति
विलुप्तगुणोक्तप्रकारेण प्रसिद्धकीर्तिः सन्नपि महाबलः एकशरविमोचनेन सकलराक्षसनिरसनसमर्थः
अपि शब्दः समवंचसंबंधः एवंभूतो ऽपि रामः पितुरादेशान्नियोगाद्राज्यं नैच्छदिति योजना पितुर्वचनगौरवा
द्भरतेनार्थितं राज्याभिषेकं नैच्छदित्यर्थः पादुके चेति २६ २७ ॥

वा ल्मी भरताग्रजः अस्य भरतस्य राज्याय राज्यं कर्तुं अहल्या दृष्टवैभव पादस्पृष्ट पादुके न्यासरूपेण दत्वा बहुविधैः सांत्वैः
रा टी पुनः पुनः भरतं निवर्तयामासेति संबंधः राज्यस्य निक्षेपतया स्वतन्निवृत्तिपूर्वकं परस्य तत्पादुकविषयताभा
८ वात् चतुर्थ्या अप्रसक्तेः रस्येति संबंधसामान्ये षष्ठी सकाममिति सभरतः राममभिषेकार्थं रामप्रत्यानय
नलक्षणं मनोरथं अनवाप्यैव नंदिग्रामे रामपादौ रामपादुके अनुदिनं उपस्पृशन् नमस्कुर्वन् रामागम

8

निवर्तयामास ततो भरतं भरताग्रजः स काममनवाप्यैव रामपादावुपस्पृशन् ३८
नंदिग्रामेऽकरोद्राज्यं रामागमनकांक्षया गते तु भरते श्रीमान्सत्यसंधो जितेंद्रियः ३९
रामस्तु पुनरालक्ष्य नागरस्य जनस्य च तत्रागमनमेकाग्रो दंडकान्प्रविवेश ह ४०

नकांक्षया नंदिग्रामे स्थित्वा राज्यमकरोत् पालयामास गते त्विति भरते गते सति श्रीमान्सर्वातिशायिकां
तिमान् सत्यसंधः सत्यप्रतिज्ञः जितेंद्रियः ३९ राज्यभोगलौल्यरहितो नागरस्य जनस्य अयोध्यावासिनो राम
जनस्य च शब्दाद्भरतस्य च तत्र चित्रकूटे पुनरागमनमालक्ष्य पितुर्वचनपरिपालने एकाग्रचित्तः सन् ८
दंडकान् दंडकाख्यवनं प्रविवेश ४० ॥ ॥ श्रीरामाय नमः ॥ ॥

श्रवांनरव नवाक्छल्याहऊवचनंहेति । प्रसिद्धोप्रविश्यतु महारण्यमित्यारण्यकाण्डकथासंग्रहः क्रियते तु
शब्दोवधारणे राजीवलोचनोरामः राजीवलोचनंविशेषणं रामस्यमहावनप्रवेशसंभाविनराक्षसयुद्धारंभा
र्जितहर्षस्त्रीनयति महारण्यंदंडकाख्यवनंप्रविश्यचशरभंगनामानंमुनिंददर्श ४१ तथासुतीक्ष्णादी
नपिददर्श अगस्त्येति सरासनानिप्रतिग्रहाण्यैवमुपादगस्त्यवचनादैन्द्रः परमप्रीतोविष्णुः तस्येदमैन्द्रं

प्रविश्यतुमहारण्यंरामोराजीवलोचनः विराधराक्षसंहत्वाशरभंगंददर्शह ४१ सुती
क्ष्णंचाप्यगस्त्यंचअगस्त्यभ्रातरंतथा अगस्त्यवचनाच्चैवजग्राहैंद्रंशरासनं ४२ ख
ड्गंचपरमप्रीतस्तूणीचाक्षयसायकौ वसतस्तस्यरामस्यवनेवनचरैःसह ४३ ऋ
षयोभ्यागमन्सर्वेवधायासुरराक्षसां रामंकमलपत्राक्षंशरण्यंशरणैषिणः ४४ म
हेन्द्रमिवदुर्धर्षंबाणखड्गधनुर्धरं सतेषांप्रतिशुश्रावराक्षसानांतदावने ४५ ॥

क्षय्यः सायकौ ययोस्तौ ४२ निजायुधलाभात्परमप्रीतः अक्षतूणीइषुधीचजग्राह वसतइति ४३ सर्वेऋषयः असुरराक्षसानांवधायवनच
रैर्वानप्रस्थमुनिभिस्तस्यरामस्याभ्यागमन् समीपइतिशेषः यद्वाअन्नादेरेषणशीलाहिंसानहरामस्यतापसवेषे
णावस्थानंअन्नाहत्यसर्वेऋषयोपंडुष्टान्स्वहेत्यास्मान्रक्षिष्यतीतिनिश्चित्यरामंशरण्यमागताइत्यर्थः स
तेषामिति सरामःराक्षसानांवने राक्षसवसनभूतेवने तेषामृषीणांतदाप्रार्थनावचनंप्रतिशुश्राव अंगी

अंगीकृतमर्थमाह प्रतिज्ञातश्चेति रामेणेति अग्निकल्पानामग्निसदृशानां दंडकारण्यवासिनां ऋषीणां सन्निधा
विति शेषः संयति युद्धे प्राप्तकाले रक्षसां वधः प्रतिज्ञातश्चेति संबंधः ४६ तेनेति तेन रामेण तत्रैव दंडका
रण्यान्तर्भूतपंचवट्याश्रमे वसता जनस्थाननिवासिनी जनस्थानं नाम दंडकारण्ये रावणस्य बलनिवे
शस्थानं कामरूपिणी कामेनेच्छया रूपमस्यास्तीति तथा शूर्पणखा विरूपिता कर्णनासाछेदेन वैरू

प्रतिज्ञातश्च रामेण वधः संयति रक्षसां । ऋषीणामग्निकल्पानां दंडकारण्यवासिनां ४६
तेन तत्रैव वसता जनस्थाननिवासिनी । विरूपिता शूर्पणखा राक्षसी कामरूपिणी ४७
ततः शूर्पणखावाक्यादुद्युक्तान्सर्वराक्षसान् । खरं त्रिशिरसं चैव दूषणं चैव राक्षसं ४८
निजघान रणे रामस्तेषां चैव पदानुगान् । वने तस्मिन्निवसता जनस्थाननिवासिनां ४९

प्यपादिता ४७ ततः शूर्पणखावैरूप्यकरणानंतरं शूर्पणखावाक्यादुद्युक्तान् युद्धाय सन्नद्धान्सर्वराक्षसान् ।
चतुर्दशसहस्रसंख्याकप्रधानराक्षसान् तेष्वपि प्रधानभूतांस्त्रीन्दिशति खरमिति तेषां पूर्वोक्तराक्षसादी
नां च पदानुगान् अनुचरांश्च रणे निजघानेति संबंधः ४८ निहतान्प्रधानान्स चष्टे तस्मिन्निवसता रामेणे
ति शेषः ततइति ततः खरादिवधानंतरं ज्ञातिवधं अकंपनशूर्पणखामुखेभ्यः श्रुत्वा क्रोधमूर्छितः क्रोधेन
व्याप्तः सन् मारीचनामराक्षसं सीताहरणे सहायं वरयामास इति योजना वार्यमाणइति ४९ ॥ ॥

५० ५१ हे रावण लोकरावणबाधक अप्रमेयबलेन तेन रामेण ते विरोधो न क्षम इति बहुशो वार्यमाणोपि स रावणः
कालचोदितः सन् तद्वाक्यमनादृत्य सहमारीचः तस्य खरदूषणहन्तुः तेन प्रसिद्धस्य रामस्य आश्रमपदं जगामेति
योजना तेनेति तेन मृगरूपधारिणा मारीचेन नृपात्मजौ दशरथसुतौ दूरं यथा भवतितथा ५२ ५३ अपसार्य

रक्षसां निहतान्यासन् सहस्राणि चतुर्दश तनो ज्ञातिवधं श्रुत्वा रावणः क्रोधमूर्छितः ५०
सहायं वरयामास मारीचं नाम राक्षसं वार्यमाणः सुबहुशो मारीचेन स रावणः ५१
न विरोधो बलवता क्षमो रावण तेन ते अनादृत्य तु तद्वाक्यं रावणः कालचोदितः ५२
जगाम सहमारीचस्तस्याश्रमपदं तदा तेन मायाविना दूरमपवाह्य नृपात्मजौ ५३ ज
हार भार्यां रामस्य गृध्रं हत्वा जटायुषं गृध्रं च निहतं दृष्ट्वा हृतां श्रुत्वा च मैथिलीं ५४
राघवः शोकसंतप्तो विललापाकुलेन्द्रियः ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषं ५५

देवीमोचनार्थमागतं जटायुषं गृध्रं हत्वा हतप्रायं कृत्वा रामस्य भार्यां जहारेति संबंधः गृध्रं चेति निहतं कण्ठगत
प्राणं श्रुत्वा गृध्रमुखादिति शेषः विललाप यथा देवयत् आकुलानि इन्द्रियाणि लेन्द्रियः आकुलानि शोकव
शानि इन्द्रियाणि यस्य सः तथा ततइति ततः विलापानन्तरं तेनैव शोकेन रावणेन सीतापहृतेति निवेदयमा
नजटायुर्विषयशोकेनैवोपलक्षितः जटायुषं दग्ध्वा विधिना संस्कृत्य ५४ ५५ ॥ राम ॥ ॥

वाल्मी सीतां वने मार्गमाणः रूपेण विकृतं कबंधं संददर्शेति संबंधः ५६ तमिति तं कबंधं निहत्य ददाह च स च स्व
रा टी र्गतः स्वर्गगतः प्राप्तवान् स्वर्गगमनयोग्यं स्वकीयं गंधर्वरूपं प्राप्तवानित्यर्थः स कबंधः हे राघव शबरीं श
१० बरस्त्रियं धर्मचारिणीं श्रवणकीर्तनादिभगवद्धर्माचरणशीलां धर्मनिपुणां सामान्यविशेषरूपधर्मनि-

10

मार्गमाणो वने सीतां राक्षसं संददर्श ह कबंधनाम रूपेण विकृतं घोरदर्शनं ५६ तंनि
हत्य महाबाहुर्ददाहस्वदिवंययौ स चास्य कथयामास शबरीं धर्मचारिणीं ५७।
श्रमणीं धर्मनिपुणामभिगच्छेति राघव सोऽभ्यगच्छन्महातेजाः सर्वशत्रुनिषूदनः ५८
शबर्या पूजितः सम्यग्रामो दशरथात्मजः पंपातीरे हनुमता संगतो वानरेण ह ५९॥

पुणां श्रमणीं चतुर्थाश्रमं प्राप्तां जितेंद्रियत्वपूर्वकमोक्षोपयुक्ताचारनिष्ठामित्यर्थः ५७ एवंभूतां भक्ताम
भिगच्छेति अस्य रामस्य कथयामासेति योजना प्रथमांतपाठे त्वयमुत्तरशेषः सोऽभ्यगच्छदिति स्पष्टमेतत् राम
५८ शबर्येति सम्यक्पूजितः यथाविधि अर्घ्यादिफलसमर्पणेनोपचारेणार्पितः पंपातीर इत्यादिना १०
किष्किंधाकांडकथासंग्रहः क्रियते पंपातीर इति संगतः राम इत्यनुषज्यते हेति हर्षे ५९ ॥ ॥

हनुमदिति हनुमद्वचनात् सुग्रीवो ऽनुभ्रंसंगमपेक्षित इत्यादिरूपं हनुमद्वचनं सुग्रीवायेति महाबलो रामः
आदितः जन्मन आरभ्य तत्रसिद्धं वृत्तं सीतायास्तु हरणं च रावणहननादि सर्वं सुग्रीवाय विशेषतः विशेषेण
यथावृत्तं जन्मनतिक्रम्य शंसत् अशंसत् अडभाव आर्षः महाबल इति विशेषणं सामर्थ्यात् सहायमंतरेण
सर्वनिर्वाहकर्तापि लोकरीतिमनुसृत्य सुग्रीवसहायमुद्दिश्य सर्वमकथयदित्यवगम्यते सुग्रीव इति वानरः

हनुमद्वचनाच्चैव सुग्रीवेण समागतः सुग्रीवाय च तत्सर्वं शंसद्रामो महाबलः ६०
आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः
६१ चकार सख्यं रामेण प्रीतश्चैवाग्निसाक्षिकं ततो वानरराजेन वैरानुकथनं प्रति ६२
रामायावेदितं सर्वं प्रणयाद्दुःखितेन च प्रतिज्ञातं च रामेण तदा वालिवधं प्रति ६३ ॥

सुग्रीवोपि रामस्य संबंधि तत्सर्वं श्रुत्वा स्वसमानदुःखमहाबलसंबंधाभावात् सुप्रीतः सन् रामेण अग्निसाक्षिकमेव
अग्निः साक्षी साक्षाद्द्रष्टा यस्य तत्तथा सख्यं साचिव्यं चकारेति योजना तत इति वानरराजेन सुग्रीवेण दुःखितेन
सुहृत्संनिधौ स्वतदुःखेन वैरस्यानुकथनं प्रश्नप्रतिवादिना सह तत्र वैरकथनमभूदिति एवंरूपं प्रतीत्यर्थः ।
६० ६१ ६२ रामाय प्रणयात् प्रस्तुतं आवेदितं साकल्येनोक्तमित्यर्थः प्रतिज्ञातमिति तदा वैरवृत्तांतश्र-
वणानंतरकाले रामेण वालिवधमुद्दिश्य अवश्यं वालिनं वधिष्यामीति प्रतिज्ञातं ६३ ॥ ॥

वाल्मी
रा टी
११

वालिन इति तत्र ऋष्यमूके वानरः सुग्रीवः वालिनो वलं अहत्योद्यमारभ्यप्रहूर्यो दयान्पूर्वमेव चतुःसमुद्राभि
गमनादिकं वालिपौरुषं रामस्योत्साहवर्धनार्थं अकथयदित्यर्थः सुग्रीव इति अपि वा राघवे राघवविष
ये वीर्येण हेतुना नित्यं सुग्रीवः शङ्कितश्चासीत् रामस्य वालिहनने सामर्थ्यमस्ति नवेति सुग्रीवो नि
त्यमशङ्किष्टेत्यर्थः ६४ राघवेति राघववलपरिज्ञानार्थं महापर्वतसन्निभं दुंदुभेः कायं वालिना हतस्य
दुंदुभिनाम्ना असुरस्य देहं रामाय दर्शयामास इदं शरीरं वालिना एतावद्दूरं क्षिप्तमित्युक्त्वा तद्दर्शयामा

वालिनस्तु वलं तस्य कथयामास वानरः सुग्रीवः शंकितश्चासीन्नित्यं वीर्येण राघवे ६४
राघवप्रत्ययार्थं तु दुंदुभेः कायमुत्तमम् दर्शयामास सुग्रीवो महापर्वतसन्निभं ६५
उत्स्मयित्वा महावाहुः प्रेक्ष्य चास्थि महावलः पादांगुष्ठेन चिक्षेप संपूर्णं दशयो जनं

सेत्यर्थः ६५ उत्स्मयित्वेति महावाहुः महत्वं नाम अंगुल्येकदेशेन लोकविरोधिसकलदैत्यादिह
ननशक्तत्वं तथा च युद्धकांडे पिशाचान्दानवान्यक्षान्पृथिव्यां ये च राक्षसाः अंगुल्यग्रेण तान्
हन्यामिच्छन्हरिगणेश्वरेति महावलं अपरिच्छेद्यवलो रामः ज्ञानिनोपि मुह्यन्ति किं पुनः कपिरिति
उत्स्मयित्वा उदारं ईषद्धास्यं कृत्वा अस्थिनिचयरूपं शरीरं प्रेक्ष्य दशयोजनपरिमितं देशं संपूर्णं राम
यथा भवति तथा पादांगुष्ठेन चिक्षेप प्रक्षिप्तवान् ६६ ॥ ॥ श्रीराम ॥ ॥ ११

विभेदेति तदानीमाद्यं शरीरं इदानीं सुखमिति सुग्रीवस्य विमर्शे सति पुनः प्रत्ययं विश्वासं जनयन् हेतो
शात् प्रत्ययः तदा तस्मिन्काले सप्ततालान् सप्ततालवृक्षान् गिरिं तत्समीपस्थं पर्वतं च रसातलं
चाधोलोके भुवपृष्ठे लोके रसातलं एकेन महेषुणा शरप्रयोगेनैव विभेद एकताल मात्रभेदनेऽप्यस्य
वालिनाशस्य शंका जायेत तन्माभूदिति तत्रिकस्यार्थं अचोदितानामपि सप्ततालगिरिप्रस्थादीनां भे

विभेद च पुनस्तालान्सप्तैकेन महेषुणा गिरिं रसातलं चैव जनयन्प्रत्ययं तदा
ततः प्रीतमनास्तेन विश्वस्तः स महाकपिः किष्किन्धां रामसहितो जगाम च गुहां त
दा ६८ ततोऽगर्जद्धरिवरः सुग्रीवो हेमपिङ्गलः तेन नादेन महता निर्जगाम हरी॰

दनमिति मंतव्यं ६७ ततइति ततः तालभेदानंतरं तेन तालभेदेन विश्वस्तः विश्वासं प्राप्तः सर्वात्मना रामो
दर्शनमात्रेण वालिनं हनिष्यतीति विश्वासं प्राप्तः प्रीतमनाः कपिराज्यमचिरादेव मम हस्तगतं भविष्यती
ति प्रीतमना इत्यर्थः तदा तस्मिन्काले किष्किन्धायुहां पर्वतांतरवकाशे गुहा तत्र निर्मितं वालिकिष्किन्धापि
गुहाशब्देनोच्यते जगामेति योजना ६८ ततइति ततः सुग्रीवः अगर्जत् सिंहनादं कृतवान् तेन
नादेन हनुना हरीश्वरो वाली गुहाया निर्जगाम ६९ ॥ ॥ राम ॥

वाल्मी रा टी १२

तदा निर्गमनसमये तारामनुमान्य सुग्रीवस्य रामसख्यं अंगदमुखादवगत्य युद्धाय निर्गमनं वारयंती तां रामो धर्मज्ञो ममापकारं न करिष्यतीत्यादिसांत्ववचनैरनुमतिं प्राप्य सुग्रीवेण सह युद्धाय समागतोऽभवत् निजघानेति तत्रं संयुगे वालिनं एकेनैव शरेण जघान हननमेव अनुवदति २० तत इति सुग्रीववचनात् वालिनं जहि काकुत्स्थ मया बद्धोयमंजलिरित्येवं रूपात् आहवे वालिनं हत्वा राघवः सुग्रीवं तत्र राज्ये प्रत्यपादयत्

अनुमान्य तदा तारां सुग्रीवेण समागतः निजघान च तत्रैनं शरेणैकेन राघवः २० ततः
त्वा सुग्रीववचनाद्धत्वा वालिनमाहवे सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत् २१ स च स
र्वान्समानीय वानरान्वानरर्षभः दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजां २२ ततो गृध्र
स्य वचनात्संपातेर्हनुमान्बली शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवं २३ तत्र लंकां
समासाद्य पुरीं रावणपालितां ददर्श सीतां ध्यायन्तीमशोकवनिकां गतां २४ निवेदयि
त्वाभिज्ञानं प्रवृत्तिं च निवेद्य च समाश्वास्य च वैदेहीं मर्दयामास तोरणं २५ ॥ ॥

प्रतिष्ठापितवानित्यर्थः २१ स चेति स च वानरर्षभः जनकात्मजां दिदृक्षुः द्रष्टुमिच्छुः सर्वान्वानरान् समानीय दिशः प्रस्थापयामास २२ तत इति गृध्रस्य संपातेर्वचनात् तस्यां वसति वैदेहीं दीना क्रोशशतवासिनीत्येवं रूपात् शतयोजनमित्यादिना सुन्दरकांडकथासंग्रहः क्रियते शतयोजनमिति पुप्लुवे उल्लंघितवान् २३ लंकां पुरीं समासाद्य तत्र लंकायां अशोकवनिकायां तोरणं अशोकवनिकाबहिर्द्वारं चकार दशो

राम १२

12

पंचसेनेति पंचसेनाग्रगान् सेनापतीन् अक्षं रावणकुमारं निष्पिष्य चूर्णीकृत्य ग्रहणं समुपागमत् इंद्र
जित्प्रयुक्तब्रह्मास्त्रेण बंधनं प्राप्तः ७६ अस्त्रेणेति मदस्त्रस्य अमोघतया बंधनमात्रं पंचघटिकानंतरं मो
क्षश्च भविष्यतीति ब्रह्मणा हनुमते वरो दत्तः अतः पंचघटिकानंतरमेव ब्रह्मास्त्रेणोन्मुक्तमात्मानं ज्ञात्वा
पि यदृच्छया कार्यांतरप्रसंगेन रावणदर्शनापेक्षया मंत्रिणः आत्मानं बध्नानयतः तान् राक्षसान् अतिवीरः ह

पंचसेनाग्रगान् हत्वा सप्त मंत्रिसुतानपि शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत् ७६
अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्धरिः मर्षयन् राक्षसान्वीरो यंत्रिणस्तान्य
दृच्छया ७७ ततो दग्ध्वा पुरीं लंकामृते सीतां च मैथिलीं रामाय प्रियमाख्यातुं पु
नरायान्महाकपिः ७८ सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणं न्यवेदयदमेयात्मा दृ

नुमर्षणो विमर्षयन् क्षमां कुर्वन् ७७ ततः रावणदर्शनाद्व्यापारानंतरं मैथिलीं सीतां मृते तदवस्थानप्रदेशं
विना लंकां दग्ध्वा रामाय प्रियवार्तामाख्यातुं पुनः रामांतिकं महाकपिरायादिति योजना ७८ सोऽभिगम्येति अमे
यात्मा अपरिच्छेद्यधैर्यः स हनुमान् महात्मानं महाशयः सो अनात्मा च न परमात्मानमित्यर्थः राममभिगम्य तं
प्रदक्षिणं कृत्वा दृष्टा सीतेति न ततः सार्वविभक्तिकस्तसिः तत्त्वं न्यवेदयदित्यर्थः अत्र दृष्टेति पदस्य प्रथ
मप्रयोगेण मम सीतानुदर्शनविषयसंशयो माभूदिति ७९ ॥ ॥ राम ॥ ॥

वाल्मी
रा. टी.
१२

ततः सुग्रीवसहित इत्यारभ्य युद्धकाण्डकथासंग्रहः क्रियते ततइति समुद्रं क्षोभयामास मार्गदाने औदासीन्या
त् समुद्रं महापातालमाकुलीचकारेत्यर्थः ८० दर्शयेति आत्मानं निजरूपं दर्शयामास समुद्रवचनात् एवं से
तुं महोत्साहः करोतु मयि वानरः तमहं धारयिष्यामि तथा ह्येष भविष्यति एवंरूपसमुद्रवचनादेव नलं सेतु
मकारयत् नलेन सेतुं कारयामासेत्यर्थः ८१ तेनेति हनुमान् लङ्कां पुरीं गत्वा आहवे युद्धे रावणं हत्वा सीतां प्रा

ततः सुग्रीवसहितो गत्वा तीरं महोदधेः समुद्रं क्षोभयामास शरैरादित्यसन्निभैः ८०
दर्शयामास चात्मानं समुद्रः सरितां पतिः समुद्रवचनाच्चैव नलं सेतुमकारयत् ८१
तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे रामः सीतामनुप्राप्य परां व्रीडामुपागमत् ८२
तामुवाच ततो रामः परुषं जनसंसदि अमृष्यमाणा सा सीता विवेश ज्वलनं सती ८३
ततोऽग्निवचनात्सीतां ज्ञात्वा विगतकल्मषां कर्मणा तेन महता त्रैलोक्यं सचराचरं ८४

प्य अनु पश्चात् परां व्रीडामुपागमदिति योजना परां व्रीडां रक्षोगृहे चिरोषितां उ न गृहीतवान् इति लोकाप
वादशंकया लज्जामुपागमत् ८२ तामुवाचेति ततोऽनन्तरं रामो जनसंसदि वानरराक्षससभायां परुषं दी
पो नेत्रातुरस्येव प्रतिकूलासि मे दृढमित्यादिकमुवाच अमृष्यमाणा पातिव्रत्यसंशयविषयवचनं अस
हमाना सीता ज्वलनं ज्वलन्तमग्निं विवेश ८३ ततइति अग्निवचनात् विशुद्धभावां निष्पापां प्रतिगृह्णीष्व

राघवेत्येवंरूपात् गतकल्मषां स्वयं ज्ञात्वा लोकस्य च तथात्वं

प्रख्याप्य सीतामंगीचकारेतिशेषः ८४ ॥ ॥

राम
१२

केचित्तु ततोग्निवचनादित्यस्यानंतरं बभौ रामः संप्रहृष्ट इत्यर्धं पंक्तिमेव पठित्वा ततः कर्मणा तेनेति श्लोकं
पठंति अस्मिन्पाठे विगतकल्मषां सीतां ज्ञात्वा संहृष्टः सर्वदैवतैश्च पूजितो रामो बभाविति योजना कर्मणे
ति राघवस्य महता तेन कर्मणा रावणवधात्मना तेन कर्मणा सचराचरं चराचरप्रजासहितं त्रैलोक्यं तुष्टं तुतोष
८५ अभिषिच्येति लंकायां लंकाराज्यपदे स्वमूह्य कृतकृत्य अहं हत्वा दशग्रीवं सप्रहस्तं सबांधवं राजानं त्वां क

सदेवर्षिगणैस्तुष्टैराघवस्य महात्मनः बभौ रामः संप्रहृष्टः पूजितः सर्वदैवतैः
८५ अभिषिच्य च लंकायां राक्षसेंद्रं विभीषणं कृतकृत्यस्तदा रामो विज्वरः प्रमु
मोद ह ८६ देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् अयोध्यां प्रस्थितो रामः
पुष्पकेन सुहृद्वृतः ८७ ॥ ॥

रिष्यामि लंकायां राक्षसेश्वरमिति प्रतिज्ञातकृत्यस्य कृतत्वात्कृतकृत्य अत एव विज्वरः विगतमनस्तापः प्रमु
मोद ह प्रकृष्टां मुदमाप ८६ देवताभ्य इति रामः सर्वजगत्कंटकरावणवधजनितहर्षवशाद्रामदिदृक्ष
या समागताभ्यो देवताभ्यो वरं प्राप्य निहतो निर्ऋताख्यो वसंपन्नबलपौरुषाः समुत्थाप्य स्वतुहृदयः सुप्ता निद्रा
क्षये यथोत्थितक्रमकारं वरलब्धा राक्षसैर्हतान् वानरान्समुत्थाप्य सुहृद्भिः सुग्रीवादिभिः संवृतः पुष्पकेण
योध्यामुद्दिश्य प्रस्थितः जगामेत्यर्थः ८७ ॥ ॥ रामायनमः ॥ ॥

वाल्मी. रा. टी. १४

भरद्वाजाश्रममिति रामः अभिरामो रामः भरद्वाजाश्रमं गत्वा भरतस्यान्तिकं प्रति हनुमन्तं व्यसर्जयत् चतुर्दशे
हि संपूर्णे वर्षे हनि रघूत्तम न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनमिति भरतेन प्रतिज्ञातवान् भरद्वा
जाश्रमे पंचम्यां चतुर्दशवर्षसमाप्त्यनंतरं मुनिवचनेन एकदिनविलंबस्य प्राप्तत्वात् स्वागतबोधनार्थं
हनुमद्विसर्जनं ८८ पुनरिति अपरेद्युः सुग्रीवसहित इति विभीषणोत्तमप्युपलक्षणं त्तस्पुष्पकसमा

भरद्वाजाश्रमं गत्वा रामः सत्यपराक्रमः भरतस्यान्तिकं रामो हनुमन्तं व्यसर्जयत् ८८
पुनराख्यायिकां जल्पन्सुग्रीवसहितस्तदा पुष्पकं तत्समारुह्य नंदिग्रामं ययौ तदा ८९
नंदिग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ९०

रुह्य पुनराख्यायिकां पूर्ववृत्तविषयां कथां अत्र सीते त्वया दृष्टा तापसी धर्मचारिणीत्यादि उक्तप्रकारेण पु
नर्जल्पन् सीतायाः इति शेषः नंदिग्रामं ययौ इति योजना ८९ नंदिग्रामे जटा भरतादिभिः सहितोऽस्य
त्वा रामः सीतामनुप्राप्य पुनिवेषत्यागेन सीतानुरूपं प्राप्येति यावत् राज्यं पुनरवाप्तवान् प्राप्तवित्सृष्टं रा
ज्यं पुनरवाप्तवानित्यर्थः ९० ॥ ॥ श्रीरामायनमः ॥ ॥ ॥

हिमा राम १४

एतं दत्तचरितं न तेनोपदिश्य देवर्षिर्नारदः परं उत्तरकाण्डविषयं भविष्यत्तेनोपदिशति प्रहृष्टेत्यादिना राज्यप्राप्त्युत्त-
रकालमेव वाल्मीकिना रामायणलक्षणमनुसंधेयं प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः चकार चरितं कृ-
त्स्नं विचित्रपदमात्मवानिति वक्ष्यमाणत्वात् ततः पश्यति धर्मात्मा तत्सर्वं योगमास्थितः पुरा यत्तत्र निर्वृत्तं
पाणावामलकं यथेत्याद्युपरि वक्ष्यमाणत्वात् लोकः सर्वो जनः प्रहृष्टः संजातरोमाञ्चः मुदितान्तःकरणः
तुष्टः सर्वकामलाभजनितप्रीतिस्तुष्टिः अनेनेसर्वकामसंपन्नो विद्यमानायामपि रामविश्लेषेणानुष्टस
इच्छामोहि महाबाहुं रघुवीरं महाबलं गजेन महता यान्तं रामं छत्रावृताननमिति प्रार्थितरामाभिषेकरूप

प्रहृष्टमुदितो लोकस्तुष्टः पुष्टः सुधार्मिकः । नि
रामयो ह्यरोगश्च दुर्भिक्षभयवर्जितः ९२ ॥

वपरमतुष्टिहेतुरिति गम्यते पुष्टः विषयेनेमहाराजरामप्रवासनकर्षिताः अपि वृक्षाः परिम्लानास्तपुष्पाङ्कुर =
कोरकाङ्कुरमुक्तप्रकारेण रामविश्लेषणकर्शितः सर्वोऽपि चेतनगणः इदानीं तु रामसंश्लेषणपरितुष्टः सर्वोऽपि पो =
भूदित्यर्थः सुधार्मिकः स्त्रियो वृद्धास्तरुण्यश्च सायंप्रातः समाहिताः सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्
स्विन इति इष्टदेवतानमस्कारादिरूपधर्मस्य फललाभात्सुधार्मिकत्वोक्तिः निरामयः मनःपीडारहितः ।
अरोगः व्याधिरहितः दुर्भिक्षभयवर्जितः भिक्षासमृद्धेरभावः दुर्भिक्षम् तस्माद्भयं दुर्भिक्षाद्भयं दुर्भिक्षभयं तेन

वाल्मी
रा टी
१५

15

न पुत्रमरणमित्यादिना उत्तरकांडकथासंग्रहः क्रियते न तत्र इति केचिदपि क्वचित् तत्रापि पुरुषाः पुत्रम
रणं न द्रक्ष्यन्ति पितरि जीवति सति पुत्रो न मरिष्यतीत्यर्थः ९२ तापत्रयसंबंधं निराकरोति न चाग्निजमि
ति आधिदैविकदुःखनिवृत्तिमुक्त्वा आध्यात्मिकं निराचष्टे नापि ज्वरमिति ९३ न तस्करभयमित्यादिना

न पुत्रमरणं केचिद्द्रक्ष्यन्ति पुरुषाः क्वचित् नार्यश्चाविधवा नित्यं भविष्यन्ति पतिव्रताः ९२
न चाग्निजं भयं किंचिन्नाप्सु मज्जन्ति जन्तवः न वातजं भयं किंचिन्नापि ज्वरकृतं तथा ९३
न चापि क्षुद्भयं तत्र न तस्करभयं तथा नगराणि च राष्ट्राणि धनधान्ययुतानि च ९४
नित्यं प्रमुदिताः सर्वे यथा कृतयुगे तथा अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः ९५ ॥

भौतिकं निराकरोति नगराणि पुराणि राष्ट्राणि जनपदानि धनधान्ययुतानि भविष्यन्तीत्यनुषंगः ९४ अ
श्वमेधानां शतैः अपरिमितैः अश्वमेधैरित्यर्थः इष्ट्वा देवताः पूजयित्वा बहुसुवर्णकैः सुवर्णदक्षिणाकैर्यागवि राम
शेषैरिष्ट्वा ९५ ॥ श्रीराम ॥ रामाय नमः ॥ ॥ १५

असंख्येयधनं दत्वा ब्रह्मलोकं प्रयास्यतीति योजना ब्रह्मैव लोकः तं परमात्मस्वरूपं सगुणस्य ब्रह्मणो विष्णोः स्वस्य
लोकं वैकुंठाख्यं प्रयास्यतीत्यर्थः ९६ राजवंशाञ्छतगुणान्विवृद्धाननुप्रत्येकं राज्यप्रदानेन स्थापयिष्यतीत्यर्थः चा
तुर्वर्ण्यं स्वधर्मे स्ववर्णाश्रमोचिते धर्मे नियोक्ष्यति प्रवर्तयिष्यति ९७ दशवर्षेति एकादशसहस्राणि राज्यमु
पासित्वा परिपाल्य ब्रह्मलोकं गमिष्यति ९८ इदं पवित्रं अंतःकरणशोधकं पुण्यं पुण्यसाधनं वेदैः संमितं तु

गवां कोट्ययुतं दत्वा ब्रह्मलोकं गमिष्यति असंख्येयं धनं दत्वा ब्राह्मणेभ्यो महायशाः ९६ रा
जवंशाञ्छतगुणान्स्थापयिष्यति राघवः चातुर्वर्ण्यं च लोकेस्मिन्स्वे धर्मे च नियोक्ष्यति ९७
दशवर्षसहस्राणि दशवर्षशतानि च रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति ९८
इदं पवित्रं पापघ्नं पुण्यं वेदैश्च संमितं यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ९९ ए
तदाख्यानमायुष्यं पठन्रामायणं नरः सपुत्रपौत्रः सगणः प्रेत्य स्वर्गे महीयते १००

ल्यं सर्ववेदार्थप्रतिपादकत्वात्तत्तुल्यं ९९ एतदाख्यानं आख्यायिकां आयुष्यं आयुर्वृद्धिकरं एतद्रामायणाख्य
प्रबंधपठनात् देवपुत्रपौत्रसहितः इह भोगान्भुक्त्वा प्रेत्य स्वर्गलोके पुण्यलोके महीयते महद्भिः पूजायां तत्र
पूजितो मोदत इत्यर्थः १०० ॥ ॥ श्रीरामाय नमः ॥ ॥

वाल्मी वर्णानां प्रतिनियतं फलमाह पठन्निति स्यादिति यद्यर्थे अव्ययं पठन् द्विजः स्यात् ब्राह्मणो यदि वा
रा टी ऋषभत्वमीयात् प्राप्नुयात् शब्दशास्त्रपारगो भवेत् क्षत्रियः स्यात् भूमिपतित्वं साम्राज्यमीयात् वणि
१६ ग्जनः स्यात् पुण्यफलत्वं पुण्यफलसमृद्धिमीयात् पठन् शूद्रोपि जनः स्यात् महत्त्वं सजातीयेषु स
र्वोत्तमत्वं ब्राह्मणाद्युक्त्वेव त्रितिर्वाचक्षते पाठेऽनधिकारिणां शूद्रादीनां श्रवणादेव फलं स्मृ एवं

पठन् द्विजो वागृषभत्वमीयात्स्यात्क्षत्रियो भूमिपतित्वमीयात् वणिग्जनः पुण्य
फलत्वमीयात् जनश्च शूद्रोपि महत्त्वमीयात् १०१ ॥ इत्यार्षे रामायणे आदिका
व्ये वाल्मीकीये नारदवाक्यं संक्षिप्तो नाम प्रथमः सर्गः १ ॥ संवत् १८ ५५ ॥

रामायणमनेनेति स्मरणात् यद्वा पठन् शूद्रोपि जनः स्यात् महत्त्वं सजातीयेषु सर्वोत्तमत्वं पूज्यत्वमीया
त् चकारादवांतरजातिः समुच्चीयते अथ चतुर्विंशतिसहस्रश्लोकैः श्रीरामायणं चिकीर्षुर्वाल्मीकिर्गाय
त्र्यादिमाक्षरेणोपक्रम्य तत्सारभूतसंक्षेपं यादिति गायत्र्यंतिमाक्षरेण निगमनं कृतवान् १०२ ॥ इति राम
श्रीरामायणे बालकांडे महेश्वरतीर्थविरचितायां तत्त्वदीपिकायां संक्षेपो नाम प्रथमः सर्गः १॥ श्रीराम १६
रामायतुभ्यं नमः ॥ ॥ हनुमते नमः ॥ ॥ लक्ष्मणाय नमः ॥ ॥